Click here to go back

Guru stotram - Bengali

|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

## অথ বৃহস্পতি স্তোত্রং [শ্রীধর্মোত্তর পুৱাণে]

শ্রী ভগৱানুৱাচ॥ বৃহস্পস্সুৱাচার্য্যো দযাৱান্ শুভলক্ষণঃ। লোকত্রযগুরুঃ শ্রীমান্ সর্ৱজ্ঞ সর্ৱগোৱিভুঃ॥ সর্ৱেশ সর্ৱাভীষ্টঃ সর্ৱজিত্সর্ৱ পূজিতঃ। অক্রোধনো মুনিশ্রেষ্ঠো নীতির্কতা গুরুঃ পিতা॥ ৱিশ্ৱাত্মা ৱিশ্ৱর্কতা চ ৱিশ্ৱযোনির্য্যোনিজঃ। ভূর্ভুৱস্সুৱরংচৈৱ র্ভতাচৈৱ মহাবলঃ। পংচৱিংশতি নামানি পুণ্যানি নিযতাত্মনা॥ নংদগোপ গ্রহাসীন ৱিষ্ণুনা কীর্তিতানি ৱৈ। প্রাতুরুত্থায পঠিতার্ৱতযেত্সু সমাহিতঃ॥ ৱিপরীতোপি ভগৱান্ প্রীতস্তস্য বৃহস্পতিঃ। যঃ শ্রুণোতি গুরুস্েগাত্রং চিরংজীৱি ন সংশযঃ॥ গোসহস্রফলং তস্য ৱিষ্ণোৱর্চনম্ অব্রৱীত্ বৃহস্পতিকৃতা পীডা কদাচিদ্ভৱিষ্যতি। ইতি শ্রীধর্মোত্তর পুৱাণে বৃহস্পতি স্তোত্রং॥

## অথ বৃহস্পতি স্তোত্রং [শ্রীস্কংদ পুৱাণে]

অস্য শ্রীবৃহস্পতিস্তোত্রস্য গৃত্সমদ ঋষিঃ। অনুষ্টুপ্ছন্দঃ। বৃহস্পতির্দেৱতা। বৃহস্পতিপ্রীত্যর্থং জপে ৱিনিযোগঃ॥ গুরুর্বৃহস্পতির্জীৱঃ সুৱাচার্য্যো ৱিদাংৱরঃ। ৱাগীশো ধিষণ্ণো দীর্ঘশ্মশ্রুঃ পীতাম্বরো যুৱা॥ সুধাদৃষ্টির্গ্রহাধীশো গ্রহপীডাপহারকঃ। দযাকরঃ সৌম্যমূর্তিঃ সুরার্চ্যঃ কুঙ্মলধ্যুতিঃ॥ লোকপূজ্যো লোকগুরুর্নীতিজ্ঞো নীতিকারকঃ। তারাপতিশ্চ অঙ্গীরসো দেৱৱৈধ্যপিতামহঃ॥ ভক্ত্যা বৃহস্পতিংস্ম্রুতৱা নামান্যেতানি যঃ পঠেত্। নিরোগি বলৱান্ শ্রীমান্ পুত্রৱান্ সঃ ভৱেন্নরঃ॥ জীৱেদর্ৱষশতং মর্ত্যো সর্ৱাঃ পাপং নশ্যতি। যঃ পূজযেদ্গুরুদিনে পীতগন্ধাক্ষতাংবরৈঃ॥ পুষ্পদীপোপহারৈশ্চ পূজযিতৱা বৃহস্পতিম্। ব্রহ্মণান্েভাজযিতৱা চ পীডাশান্তির্ভৱেদ্গুরোঃ॥ ইতি শ্রীস্কংদ পুৱাণে বৃহস্পতিস্তোত্রং॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back